तदा पश्चिमे उत्तरे वा ऐशान्यां वा स्यात् परन्तु चतुरस्रं, वेद्याः सकाशात्तानि सर्व्वाणि कुण्डानि सपादेन करेण त्रिंशदङ्गुलान्तरेण वा पादान्तरेण द्वादशाङ्गुलान्तरेण वा वेदीपादान्तरेण वेद्याश्चतुर्थांशेन वा मण्डपे नवकोष्ठकृतेऽष्टसु भागेषु मध्ये भवन्तीति व्याख्या” नारदीये “यत्रोपदिश्यते कुण्डचतुष्कं तत्र कर्म्मणि। वेदास्रमर्द्धचन्द्रं च वृत्तं पद्मनिभं तथा”। चतुःकुण्डपक्षे स्वातोनास्तीत्युक्तं नारदीये “पीठवद्वर्त्तयेत् कुण्डं सुप्रमाणमगर्त्तकम् कुर्य्यात् कुण्डानि चत्वारि प्राच्यादिषु विचक्षणः। पञ्चमं कारयेत् कुण्डमीशदिग्गोचरं द्विजेति” अयं मध्यमः पक्षः। कैश्चित्पूर्व्वेशयोरिति लिखितन्तदसत् सोमशम्भौ “एवं वा शिवकाष्ठायां प्रतीच्यां कारयेद्बुधः “आचार्य्या अपि “अथवा दिशि कुण्डमुत्तरस्यां प्रविदध्याच्चतुरस्रमेकमेव” इयं कनिष्टः पक्षः। नवग्रहाधिकारे वसिष्ठसंहितायाम् “कुण्डन्तन्मध्यभागे तु कारयेच्चतुरस्रकम्। वितस्तिद्वयखातं तत् कुण्डं तु चतुरङ्गुलमिति। वेदीपादान्तरन्त्यक्त्वा कुण्डानि नव पञ्च वेति”। नारदीये “कुण्डेष्वन्तरञ्चैव सपादकरसंमितमिति” कैश्चित्त्रयोदशाङ्गुलमप्यन्तरमुक्तं तत्र मण्डपानुसारेण व्यवस्था। अथ वर्णविशेषस्य स्त्रीणाञ्च कुण्डविशेषमाह “विप्राच्छ्रुत्यस्रं च वृत्तं च वृत्तार्द्धं त्र्यस्रं स्याद्वेदकोणानि वापि। सर्वस्याङ्गुष्ट तद्रूपाणि चान्ये योन्याकाराण्यङ्गनानां मतानि “विप्रादारभ्य विप्रक्षत्रियविट्शूद्राणां चतुःकोणवृत्तवृत्तार्द्धत्रिकोणानि भवन्ति। अथवा विप्रादिवर्णेषु चतुःकोणानि वर्त्तुलानि वा सर्व्वाणि कुण्डानि भवन्ति यदा स्त्री यजमाना तदा योन्याकाराण्येव कुण्डानि भवन्तीति व्याख्या। शारदायाम् “विप्राणां चतुरस्रं स्याद्राज्ञां वर्त्तुलमिष्यते। वैश्यानामर्द्धचन्द्राभं शूद्राणां त्र्यस्रमीरितम् चतुरस्रन्तु सर्वेषां केचिदिच्छन्ति तान्त्रिकाः”। पञ्चरात्रे “सर्वाणि तानि वृत्तानि चतुरस्राणि वा सदा” सनत्कुमारः “स्त्रीणां कुण्डानि विप्रेन्द्र! योन्याकाराणि कारयेदिति”। अथ प्राच्यादिकुण्डेषु फलविशेषमाह “सिद्धिः पुत्राः शुभं शत्रुनाशः शान्तिर्म्मृतिच्छिदे वृष्टिमारोग्यमुक्तं हि फलं प्राच्यादिकुण्डके” प्राच्यादिकुण्डेष्वष्टस्वष्टौ फलानि स्युः। शारदायाम् “सर्वसिद्धिकरं कुण्डं चतुरस्रमुदाहृतम्। पुत्रप्रदं योनिकुण्डमर्द्धेन्द्वाभं शुभप्रदम्। शत्रुक्षयकरन्त्र्यस्रं वर्त्तुलं शान्तिकर्मणि छेदमारणयोः षडस्रं पद्मसन्निभम्। वृष्टिदं रोगशमनं कुण्डमष्टास्रमीरितम्”। कामिके तु फलान्तरम् “ऐन्द्र्यां स्तम्भे चतुःकोणमग्नौ भोगे भगाकृति। चन्द्रार्द्धं मारणे याम्ये, द्वेषे त्र्यस्रन्तु नैरृते। वारुण्यां शान्तिके वृत्तं, षडस्रं त्वाटनेऽनिले। उदीच्यां पौष्टिके पद्मं रौद्र्यामष्टास्रि भुक्तिदमिति” अथ होमसंख्यया कुण्डमानम्। “शतार्द्धे रत्निः स्याच्छतपरिमितेऽरत्निविततः सहस्रे हस्तःस्यादयुतहवने हस्तयुगलम्। चतुर्हस्तं लक्षे प्रयुतहवने षट्करमितैः ८ ककुब्भिर्वा १० कोणैर्नृपकरमपि प्राहुरपरे” शतार्द्धमिते पञ्चाशन्मिते होमे रत्निमितं कुण्डं, शतमिते अरत्निमितं, सहस्रमिते होमे हस्तमितं, दशसहस्रमिते द्विहस्तं, लक्षहोमे चतुर्हस्तमितं दशलक्षहोमे षड्ढस्तमितं, कोटिहोमेऽष्टहस्तमितं दशहस्तमितं वा। केचित् षोडशकरमपि प्राहुरितिव्याख्या भविष्यपुराणे “मुष्टिमानं शतार्द्धे तु शते चारत्निमात्रकम्। सहस्रे त्वथ होतव्ये कुण्डं कुर्य्यात्करात्मकम्। द्विहस्तमयुते तच्च लक्षमाने चतुःकरम्। दशलक्षमिते होमे षट्करं सम्प्रचक्षते। अष्टहस्तात्मकं कुण्डं कोटिहोमेषु नाधिकम्” शारदायाम् “दशहस्तमितं कुण्डं कोटिहोमेऽपि शस्यते” स्कान्दे “कोटिहोमे चतुर्हस्तं चतुर्हस्तं समन्ततः। योनिवक्त्रद्वयोपेतन्तदप्याहुस्त्रिमेखलमिति” इदं प्रायःस्थूलहव्यविषयम् “अथ केषांचिन्मते कुण्डमानम् “लक्षैकवृद्ध्यादशलक्षकान्तं करैकवृद्ध्यादशहस्तकञ्च। कोट्यर्द्धदिग्विंशतिलक्षलक्षदले मुनीष्वर्त्तु क्रमानुहस्तम्”। लक्षस्यैकवृद्ध्या दशलक्षकाणामन्तं समाप्तीकृत्यादशलक्षकान्तम् एकलक्षमारभ्य लक्षवृद्ध्या दशलक्षपर्यन्तमित्यर्थः करस्य एकवृद्ध्यादशहस्तकम्मर्य्यादीकृत्येत्यादशहस्तकम् एककरमारभ्य एककरवृद्ध्या दशहस्तं यावत्कुण्डं प्राहुरिति पूर्वेणान्वयः कोटेरर्द्धे पञ्चाशल्लक्षे दशविंशतिलक्षे लक्षदले पञ्चाशत्सहस्रे क्रमात् सप्तपञ्चषट्त्रिकरं कुण्डमिति व्याख्याः शारदायाम् “एकहस्तमितं कुण्डं लक्षहोमे विधीयते। लक्षाणां दशकं यावत्तावद्धस्तेन वर्द्धयेत्” सिद्धान्तशेखरे “लक्षार्द्धे त्रिकरं कुण्डं लक्षहोमे चतुःकरम्। कुण्डं पञ्चकरम्प्रोक्तं दशलक्षाहुतौ क्रमात्। षड्ढस्तं लक्षविंशत्यां, कोट्यर्द्धे सप्तहस्तकमिति”। इदमेव कुण्डमानङ्कामिकादिमतं सिद्धान्तशेखरशारदाहेमाद्रिप्रमुखैः प्राचीनैः राघवभट्टरामवाजपेयिकुण्डरत्नाकरकुण्डकौमुदीकारादिभिर्नवीनैश्च लिखितं कुत्रचिदन्यथापि कुण्डमानान्युक्तानि तानि तत्तत्प्रकरण-